# द्वादश-ज्योतिर्लिङ्ग-स्तोत्रम्

सौराष्ट्र-देशे वसुधावकाशे ज्योतिर्-मयं चन्द्र-कलावतंसम्।

भक्ति-प्रदानाय कृतावतारं तं सोम-नाथं शरणं प्रपद्ये ॥ १ ॥

श्री-शैल-शृङ्गे विविध-प्रसङ्गे शेषाद्रि-शृङ्गेऽपि सदा वसन्तम्।

तमर्जुनं मल्लिक-पूर्वम्-एनं नमामि संसार्-असमुद्र-सेतुम् ॥ २॥

अवन्तिकायां विहितावतारं मुक्ति-प्रदानाय च सज्जनानाम्।

अकाल-मृत्योः परिरक्षणार्थं वन्दे महा-काल-महा-सुरेशम् ॥ ३॥

कावेरिका-नर्मदयोः पवित्रे समागमे सज्जन-तारणाय।

सदैव-मान्धातृ-पुरे वसन्तम् ओङ्कारमीशं शिवम् एकम् ईडे॥ ४॥

पूर्वोत्तरे पारलिकाभिधाने सदा शिवं तं गिरिजा-समेतम्।

सुरासुराराधित-पाद-पद्मं श्री-वैद्यनाथं सततं स्मरामि ॥ ५ ॥

आमर्द-संज्ञे नगरे च रम्ये विभूषिताङ्गं विविधैश्च भोगैः।

सद्भुक्ति-मुक्ति-प्रदमीशम् एकं श्रीनागनाथं शरणं प्रपद्ये ॥ ६॥

सानन्दम्-आनन्दवने वसन्तम् आनन्द-कन्दं हत-पाप-वृन्दम्।

वाराणसी-नाथम्-अनाथ-नाथं श्री-विश्वनाथं शरणं प्रपद्ये ॥ ७॥

यो डाकिनी-शाकिनिका-समाजे निषेव्यमाणं पिशिताशनैश्च ।

सदैव भीमादि-पद-प्रसिद्धं तं शङ्करं भक्तहितं नमामि ॥ ८ ॥

श्री ताम्रपर्णी-जल-राशि-योगे निबद्ध्य सेतुं निशि बिल्व-पत्रैः।

श्रीरामचन्द्रेण समर्चितं तं रामेश्वराख्यं सततं नमामि ॥ ९ ॥

सिंहाद्रि-पार्श्वेऽपि तटे रमन्तं गोदावरी-तीर-पवित्र-देशे ।

यद्दर्शनात् पातक जात नाशः प्रजायते त्र्यम्बकम् ईशम् ईडे ॥१०॥

हिमाद्रि-पार्श्वेऽपि तटे रमन्तं सम्पूज्यमानं सततं मुनीन्द्रैः ।

सुरासुरैर्-यक्ष-महोरगाद्यैः केदार-संज्ञं शिवम् ईशम् ईडे ॥११॥

इलापुरी रम्य-शिवालयेऽस्मिन् समुल्लसन्तं त्रिजगद्-वरेण्यम्।

वन्दे महोदारतर-स्वभावं सदाशिवं तं धिषणेश्वराख्यम् ॥१२॥

एतानि लिङ्गानि सदैव मर्त्याः प्रातः पठन्तोऽमलमानसाश्च।

ते पुत्र-पौत्रैश्च धनैर्-उदारैः सत्कीर्ति-भाजः सुखिनो भवन्ति॥१३॥

॥इति श्रीमद्-शङ्कराचार्य-विरचितं द्वादश-ज्योतिर्लिङ्ग-स्तोत्रं सम्पूर्णम्॥

# Dvādaśha-jyotirliṅga-stotram

saurāṣhṭra-deśhe vasudhāvakāśhe jyotir-mayaṃ chandra-kalāvataṃsam।
bhakti-pradānāya kṛtāvatāraṃ taṃ soma-nāthaṃ śharaṇaṃ prapadye ॥ 1 ॥
śhrī-śhaila-śhṛṅge vividha-prasaṅge śheṣhādri-śhṛṅge'pi sadā vasantam।
tam arjunaṃ mallika-pūrvam-enaṃ namāmi saṃsāra-samudra-setum ॥ 2॥
avantikāyāṃ vihitāvatāraṃ mukti-pradānāya cha sajjanānām।
akāla-mṛtyoḥ parirakṣhaṇārthaṃ vande mahā-kāla-mahā-sureśham ॥ 3॥
kāverikā-narmadayoḥ pavitre samāgame sajjana-tāraṇāya।
sadaiva-māndhātṛ-pure vasantam oṅkāram īśhaṃ śhivam ekam īḍe॥ 4॥
pūrvottare pāralikābhidhāne sadā śhivaṃ taṃ girijā-sametam।
surāsurārādhita-pāda-padmaṃ śhrī-vaidyanāthaṃ satataṃ smarāmi ॥ 5 ॥
āmarda-saṃjñe nagare cha ramye vibhūṣhitāṅgaṃ vividhaiśhcha bhogaiḥ।
sadbhukti-mukti-pradamīśham ekaṃ śhrīnāganāthaṃ śharaṇaṃ prapadye ॥ 6॥
sānandam-ānandavane vasantam ānanda-kandaṃ hata-pāpa-vṛndam।
vārāṇasī-nātham-anātha-nāthaṃ śhrī-viśhvanāthaṃ śharaṇaṃ prapadye ॥ 7॥
yo ḍākinī-śhākinikā-samāje niṣhevyamāṇaṃ piśhitāśhanaiśhcha ।
sadaiva bhīmādi-pada-prasiddhaṃ taṃ śhaṅkaraṃ bhaktahitaṃ namāmi ॥ 8 ॥
śhrī tāmraparṇī-jala-rāśhi-yoge nibaddhya setuṃ niśhi bilva-patraiḥ।
śhrī-rāma-chandreṇa samarchitaṃ taṃ rāmeśhvarākhyaṃ satataṃ namāmi ॥ 9 ॥
siṃhādri-pārśhve'pi taṭe ramantaṃ godāvarī-tīra-pavitra-deśhe ।
yaddarśhanāt pātaka jāta nāśhaḥ prajāyate tryambakam īśham īḍe ॥10॥
himādri-pārśhve'pi taṭe ramantaṃ sampūjyamānaṃ satataṃ munīndraiḥ ।
surāsurair-yakṣha-mahoragādyaiḥ kedāra-saṃjñaṃ śhivam īśham īḍe ॥11॥
ilāpurī ramya-śhivālaye'smin samullasantaṃ trijagad-vareṇyam।
vande mahodāratara-svabhāvaṃ sadāśhivaṃ taṃ dhiṣhaṇeśhvarākhyam ॥12॥
etāni liṅgāni sadaiva martyāḥ prātaḥ paṭhanto'malamānasāśhcha।
te putra-pautraiśhcha dhanair-udāraiḥ satkīrti-bhājaḥ sukhino bhavanti॥13॥

iti śhrīmad-śhaṅkarāchārya-virachitaṃ dvādaśha-jyotirliṅga-stotraṃ sampūrṇam॥